# Shivastotram Himalayakrita from brahmavaivarta

# શ્રીશિવસ્તોત્રં હિમાલયકૃત બ્રહ્મવૈવર્તે

## Document Information

Text title : shivastotram himAlayakRita brahmavaivarte

File name : shivastotramhimAlayakRitaBVP.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com, NA

Description-comments : Brahmavaivarta Purana Krishnakhanda

Latest update : September 14, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીશિવસ્તોત્રં હિમાલયકૃત બ્રહ્મવૈવર્તે

શ્રીગણેશાય નમઃ ।
હિમાલય ઉવાચ ।
ત્વં બ્રહ્મા સૃષ્ટિકર્તા ચ ત્વં વિષ્ણુઃ પરિપાલકઃ ।
ત્વં શિવઃ શિવદોઽનન્તઃ સર્વસંહારકારકઃ ॥ ૧॥

ત્વમીશ્વરો ગુણાતીતો જ્યોતીરૂપઃ સનાતનઃ ।
પ્રકૃતિઃ પ્રકૃતીશશ્ચ પ્રાકૃતઃ પ્રકૃતેઃ પરઃ ॥ ૨॥

નાનારૂપવિધાતા ત્વં ભક્તાનાં ધ્યાનહેતવે ।
યેષુ રૂપેષુ યત્પ્રીતિસ્તત્તદ્રૂપં બિભર્ષિ ચ ॥ ૩॥

સૂર્યસ્ત્વં સૃષ્ટિજનક આધારઃ સર્વતેજસામ્ ।
સોમસ્ત્વં શસ્યપાતા ચ સતતં શીતરશ્મિના ॥ ૪॥

વાયુસ્ત્વં વરુણસ્ત્વં ચ ત્વમગ્નિઃ સર્વદાહકઃ ।
ઇન્દ્રસ્ત્વં દેવરાજશ્ચ કાલો મૃત્યુર્યમસ્તથા ॥ ૫॥

મૃત્યુઞ્જયો મૃત્યુમૃત્યુઃ કાલકાલો યમાન્તકઃ ।
વેદસ્ત્વં વેદકર્તા ચ વેદવેદાઙ્ગપારગઃ ॥ ૬॥

વિદુષાં જનકસ્ત્વં ચ વિદ્વાંશ્ચ વિદુષાં ગુરુઃ ।
મન્ત્રસ્ત્વં હિ જપસ્ત્વં હિ તપસ્ત્વં તત્ફલપ્રદઃ ॥ ૭॥

વાક્ ત્વં રાગાધિદેવી ત્વં તત્કર્તા તદ્ગુરુઃ સ્વયમ્ ।
અહો સરસ્વતીબીજં કસ્ત્વાં સ્તોતુમિહેશ્વરઃ ॥ ૮॥

ઇત્યેવમુક્ત્વાશૈલેન્દ્રસ્તસ્થૌ ધૃત્વા પદામ્બુજમ્ ।
તત્રોવાસ તમાબોધ્ય ચાવરુહ્ય વૃષાચ્છિવઃ ॥ ૯॥

સ્તોત્રમેતન્મહાપુણ્યં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
મુચ્યતે સર્વપાપેભ્યો ભયેભ્યશ્ચ ભવાર્ણવે ॥ ૧૦॥

અપુત્રો લભતે પુત્રં માસમેકં પઠેદ્યદિ ।
ભાર્યાહીનો લભેદ્ભાર્યાં સુશીલાં સુમનોહરામ્ ॥ ૧૧॥

ચિરકાલગતં વસ્તુ લભતે સહસા ધ્રુવમ્ ॥ ૧૨॥

રાજ્યભ્રષ્ટો લભેદ્રાજ્યં શઙ્કરસ્ય પ્રસાદતઃ ।
કારાગારે શ્મશાને ચ શત્રુગ્રસ્તેઽતિસઙ્કટે ।
ગભીરેઽતિજલાકીર્ણે ભગ્નપોતે વિષાદને ॥ ૧૩॥

રણમધ્યે મહાભીતે હિંસ્રજન્તુસમન્વિતે ।
સર્વતો મુચ્યતે સ્તુત્વા શઙ્કરસ્ય પ્રસાદતઃ ॥ ૧૪॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે
હિમાલયકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીકૃષ્ણજન્મખણ્ડ અધ્યાય ૩૮ શ્લોકાનિ ૬૫-૭૮

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com, NA

---

*Shivastotram Himalayakrita from brahmavaivarta*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*